# SAMPLE PAPER

## संस्कृतम्

अवधि : होरात्रयम् कक्षा – अष्टमी पूर्णांकाः –80

निर्देषाः – (1) सर्वे प्रश्नाः अनिवार्याः ।

(2) प्रश्नपत्रे चतुर्खण्डाः सन्ति । खण्डस्थ प्रश्नानाम् उत्तराणि क्रमेणैव देयानि ।

(3) उत्तराणि सुवाच्याक्षरैः संस्कृतेनैव लेखनीयानि ।

(4) अस्मिन् प्रश्न–पत्रे पंच क्रमपत्राणि सन्ति ।

## खण्डः 'क' (अपठितावबोधनम् –10अंकाः)

**प्र.1 अधोलिखितम् गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत –**

दीपावली प्राचीनतमं पर्व। अस्मिन् दिने सर्वाधिकम् आकर्षकं मनोरंजनं भवति स्फोटकानाम् आस्फोटनम्। विचित्राणि वर्णयुक्तानि स्फोटकानि आकाशे भूमौ च विविधरूपाणि दर्शयन्ति। जनाः तानि दृष्ट्वा तुष्यन्ति । परन्तु अति सर्वत्र वर्जयेत् । रात्रौ आस्फोटकानां शब्दः कर्णौ बधिरी करोति वायुमण्डलं च दूषयति। पूर्वं तु जनसंख्या सीमिता आसीत्। वृक्षाः वायुं शुद्धं कुर्वन्ति स्म। इदानीं जनसंख्या प्रवृद्धा, वृक्षसंख्या क्षीणा। विस्फोटकेभ्यः निर्गतः धूमः रूग्णान् पीडयति, नवजातशिशुभ्यः हानिकरः सिध्यति। दीपावली–समये शरदि आकाशः निर्मलः भवति। सर्वत्र पवित्रता विराजते। अतः वयम् आनन्देन दीपावलीं मानयेम, वसुन्धरां भूषितां कुर्याम न तु दूषिताम्। सर्वेषां जीवनं सुखमयं भवेत्। किं तेन उत्सवेन यः कस्मैचित् अपि कष्टकरः भवेत्। 'मा कश्चित् दुःखभाग भवेत्' इति अस्माकम् आदर्शः ।

**I. एकपदेन उत्तरत –** **(½×4=2)**

क) दीपावली कस्यां ऋतौ भवति ? (शरदऋतौ / वसन्तऋतौ)

ख) वायुं के शुद्धं कुर्वन्ति ? (वृक्षाः / आस्फोटकाः)

**II. पूर्णवाक्येन उत्तरत –** **(2×2=4)**

क) अस्माकं कः आदर्शः ?

ख) स्फोटकानां धूमः कान् पीडयति ?

**III. अनुच्छेदस्य समुचितं शीर्षकं लिखत ।** **(2×1=2)**

**IV. यथानिर्देशमुत्तरत –** **(1×2=2)**

क) गद्यांशात् एकम् 'अव्ययं' पदं चित्वा लिखत ।

ख) 'लाभकरः' इत्यस्य विपर्ययम् पदं चित्वा लिखत ।

## खण्डः – ख (रचनात्मककार्यम् – 20 अंकाः)

**प्र.2 भवान् अंकितः । भवता अष्टमीकक्षा उत्तीर्णा । इदानीं नवम् कक्षायां प्रवेशं पातुं प्रधानाचार्यं प्रति लिखितं पत्रं पूरयत ।**

**मंजूषा –**

| |
|---|
| **भवताम्, गृहे, गृहीत्वा, भवतः, प्रधानाचार्यः, दूरे, मम, प्रवेष्टुम्, दत्वा, निवेदनम्** |

सेवायाम्,
श्रीमन्तः (1)...............
ओ. पी. जिन्दलविद्यालयः
रायगढ़नगरम् ।

श्रीमन्,

सविनयम् (2)............... इदम् अस्ति यत् अहम् अष्टमीकक्षायां 98: अंकान् (3)....उत्तीर्णः जातः । ह्यः एव वयम् वृन्दावन इत्यस्मिन् नगरे स्वनिर्मिते (4).............प्रवेशम् कृतवन्तः । मम पूर्वविद्यालयः इतः एकविंशतिक्रोश–पर्यन्तं (5)............... अस्ति । अहम् भवताम् विद्यालये (6)............... इच्छामि । भवतः विद्यालयस्य एकम् बसयानम् अपि (7)............... गृहसमीपे एव आगच्छति । अनेके बालाः वृन्दावनतः (8)............विद्यालये गच्छन्ति पठन्ति च । कृपया मह्यम् अपि स्वीकृतिम् (9)............... भवन्तः अनुगृहणन्तु ।

सधन्यवादम् ।

(10)............... आज्ञाकारी शिष्यः

अंकितः

**प्र.3 अधोलिखितं वार्तालापं मंजूषातः पदं चित्वा पूरयत –** **(1×2=5)**

| |
|---|
| **मह्यम्, मिष्टान्नानि, दीपावली, रोचन्ते, नवीनानि** |

राकेशः – हे अम्बे ! अद्य त्वम् दीपान् प्रज्वालयसि । अहम् जाने अद्य तु (1)............
इति अस्ति ?

सावित्री – पुत्र ! सत्यम् कथयसि ? आगच्छ प्रदर्शय स्व (2).............. वस्त्राणि, एतानि तु शोभन्ते ।

राकेशः – तव नवीना शाटिका अपि (3)............. रोचते । परम् मह्यम् तु मिष्ठान्नानि अपि (4).............. ।

सावित्री – रात्रौ यदा वयम् लक्ष्मीं पूजयामः तदा वयम् (5).............. अपि खादामः । इदानीम् मिष्ठान्नानि वितरणाय गच्छावः ।

**प्र.4 अधोलिखितं चित्रं दृष्ट्वा मंजूषायाम् प्रदत्तशब्दानां सहायतया प□च वाक्यानि लिखत –**

**मंजूषा –**

| |
|---|
| लघुवाटिका, पादपाः, वृक्षाः, पुष्पाणि, द्वे, वदतः, त्रोटयति, मित्रे, गृहम्, एतत् चित्रम्, एकम्, अनेके |

**(5×2=10)**



## खण्डः – ग (अनुप्रयुक्तव्याकरणम् – 20 अंकाः)

**प्र.5** अधोलिखितानि शब्दरूपाणि मंजूषायाः सहायतया पूरयतु – **(1×4=4)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | अहम् | आवाम् | ............ |
| द्वितीया | ............ | आवाम् | अस्मान् |
| तृतीया | त्वया | युवाभ्याम् | ............ |
| चतुर्थी | तुभ्यम् | युवाभ्याम् | युष्मभ्यम् |
| पंचमी | तस्मात् | ............ | तेभ्यः |

**मंजूषा –** **मामृ, वयम्, ताभ्याम्, युष्माभिः,**

**प्र.6** **अधोलिखितानि धातुरूपाणि मंजूषायाः सहायतया पूरयतु –** **(1×4=4)**

| | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथम पुरुष | तिष्ठतु | तिष्ठताम् | ............ |
| मध्यम पुरुष | पश्य | पश्यतम् | पश्यत |
| उत्तम पुरुष | भक्षयानि | भक्षयाव | ............ |
| | | | |
| प्रथम पुरुष | पठेत् | पठेताम् | ............ |
| मध्यम पुरुष | वदेः | वदेतम् | वदेत |
| उत्तम पुरुष | वदेयम् | ............ | वदेम |

**मंजूषा –** **वदेव, तिष्ठन्तु, भक्षयाम, पठेयुः**

**प्र.7** **अधोलिखितेषु वाक्येषु रेखांकितपदानां प्रकृति–प्रत्ययौ पृथक् कृत्वा लिखत । (1×4=4)**

क) बुद्धिमान् सर्वत्र आदरं लभते । (बुद्धि + मतुप् / बुद्धि + क्त्वा)

ख) पर्वतस्य रमणीयता अवर्णनीया अस्ति । (रमण + ईयत् / रमणीय + तल्)

ग) रमा चतुरा बालिका अस्ति । (चतुर् + ङीप् / चतुर + टाप्)

घ) एतत् तु ऐतिहासिकम् भवनम् प्रतीयते । (इतिहास + ठक् / ऐतिहास + ठाक)

**प्र.8** **अधोलिखितेषु वाक्येषु वाच्यानुसारम् रिक्तस्थानानि पूरयत –** **(1×4=4)**

क) बालः चन्द्रमसम् ............. ।  (पश्यति / पश्यन्ति)

ख) ............. शिशुः दृश्यते ।  (मात्रा / माता)

ग) लतया ............. खाद्यते ।  (भजनम् / भोजनम्)

घ) सः पुस्तकानि ............. ।  (पठ्यते / पठति)

**प्र.9** **अधोलिखितानां हिन्दीवाक्यानां संस्कृतेन अनुवादं कुरुत –** **(1×4=4)**

**क**) तुम सब पुस्तक पढो।

**ख**) हम पत्र लिख रहे हैं ।

**ग**) वृक्ष से पत्ते गिर रहे हैं।

**घ**) मैं विद्यालय से आ रहा हूँ।

## खण्डः 'घ' (पठितावबोधनम् –30अंकाः)

**प्र.10** **अधोलिखितं गद्यांशं पठित्वा प्रश्नानाम् उत्तरत –**

कचनार– भवतु बहुधा प्रयुक्तस्य प्लास्टिकस्य दूरगामिनः घातकाः परिणामाः वयं न द्रष्टुं शक्नुमः । प्लास्टिकं कदापि न गलति, न च अपक्षीयते । यथा अन्यानि वस्तूनि विनश्य मृत्तिकायां विलीयन्ते ।

चेनम्मा – प्लास्टिकस्य मृत्तिकायां लयाभावात् अस्माकं पर्यावरणस्य कृते महती क्षतिः भवति ।

रिप□ची – एकेन पदार्थेन अपरः पदार्थः सृज्यते अथवा विनष्टं वस्तु मृत्तिकायां मिलति । परं प्लास्टिके इयं प्रक्रिया असम्भवा एव ।

परमिन्दर – कल्पयतु, यदि शतं वर्षाणि यावत् प्लास्टिकनिर्मितानां पदार्थानां निर्माण प्रक्रिया पृथिव्यां प्रचलिष्यति तर्हि किं स्यात् ?

**I.** **कोष्ठकात् पदं चित्वा एकपदेन उत्तरत –** **(1×2=2)**

क) अन्यानि वस्तूनि विनश्य कस्याम् विलीयन्ते ? (मृत्तिकायाम् / पर्यावरणे)

ख) प्लास्टिकं पर्यावरणस्य कृते किं करोति ? (लाभः / क्षतिः)

**II.** **पूर्णवाक्येन उत्तरत –** **(2×2=4)**

क) प्लास्टिकस्य दूरगामिनः घातकाः परिणामाः कानि सन्ति ?

ख) किं प्लास्टिकम् अस्मभ्यं लाभदायकं हानिकारकं वा भवति ?

**III.** निर्देशानुसारम् उत्तरत – **(1×4=4)**

क) 'द्रष्टुम्' अत्र कः धातुः ?

अ) दृश् ब) द्रष्टु स) पश्य

ख) 'प्रचलिष्यति' अत्र कः लकारः ।

अ) लट् ब) लृट् स) लोट

ग) 'मृत्तिकायाम्' अत्र का विभक्ति ? (सप्तमी / चतुर्थी)

घ) अत्र संवादे कति पात्राणि सन्ति ? (द्वे, चत्वारि)

**प्र.11 अधोलिखितानां प्रश्ननाम् उत्तराणि पूर्णवाक्येन लिखत – (1×5=5)**

क) सप्तभगिनी–प्रदेशे कः उद्योगः सर्वप्रमुखः ?

ख) वानरपुंगवः किं ददर्श ?

ग) महाराष्ट्रस्य प्रथमा महिला शिक्षिका का आसीत् ?

घ) कुमारसंभवमहाकाव्यस्य रचयिता कः ?

ङ) अस्माकं प्रथमोपग्रहस्य नाम किम् अस्ति ?

**प्र.12 रेखांकितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (1×5=5)**

क) हिमालयः <u>उतरस्यां</u> दिशि वर्तते ।

ख) परमिन्दरः <u>उपवनं</u> प्रविशति ।

ग) <u>तडागाः</u> संसार सागराः कथ्यन्ते ।

घ) कुमारसम्भवमहाकाव्यं <u>कालिदासेन</u> विरचितम् ।

ङ) प्लास्टिकं <u>पर्यावरणाय</u> हानिकारकं भवति ।

प्र.13 अधोलिखितानां पदानां विलोमपदं म☐जूषातः चित्वा लिखत – **(1×5=5)**

| **स्वकीयम्, आरोहः, अन्धकारः, अचलः, समादरः** |
|---|

क) प्रकाशः ख) निरादरः ग) परकीयम्

घ) चलः ङ) अवरोहः

प्र.14 म☐जूषातः पदानि चित्वा रिक्तस्थानानि पूरयत – **(1×5=5)**

| **निवसन्ति, नौकाम्, प्रतीयन्ते, चला, पृथिवी** |
|---|

क) सूर्यः अचलः पृथिवी च .................. ।

ख) नौकायाम् उपविष्टः मानवः .................. स्थिरामनुभवति ।

ग) .................. स्वकीये अक्षे घूर्णति ।

घ) गुणगौरवदृष्ट्या इमानि वृहत्तराणि .................. ।

ङ) अत्र बहवः जनजातीयाः .................. ।